ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तन्नो त्वरिष्ट यज्ञँ समिमन्दधातु । विश्वेदेवास इहमादयन्तामोँ ३ प्रतिष्ठ ॥

पश्चात् वर कन्या के सम्मुख निम्न मंत्र का पाठ करें ।

ॐ समञ्जन्तुविश्वेदेवाः समापोहृदयानिनो सम्मातरिश्वासन्धा-तुसमुदेष्ट्रीदधातुनौ ॥

पश्चात् वर मंगल सूत्र कन्या के कंठ में बांधे ।

मांगल्यततुनानेन, मम जीवन हेतुना ।
कठेबध्नामि सुभगे, त्वं जीवंशरदां शतम् ॥

पश्चात् वर और कन्या के दक्षिण हाथ में मदनफल बांधें

ॐ यदाबध्नन्दाक्षायणा हिरण्यँ शतानीकाय सुमनस्यमाना तन्मऽआबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ।

पश्चात् वर और वधु के उत्तरीय वस्त्र से गांठ बाधें ।

ॐ परित्वागिर्व्वणोगिरऽइमाभवन्तुविश्वतः । वृद्धायुमनुवृद्धयो ष्टाभवन्तुजुष्टयः ॥

पश्चात् वर और कन्या को मुकुट पहनावें।

७. कन्यादान—

सर्व प्रथम सपत्नीक कन्या पिता आचमन व प्राणायाम का संकल्प करे ।

अद्येत्यादि० मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं अस्मिन्पुण्याहे अस्याः लक्ष्मीरूपण्याः कन्यायाः अनेन विष्णुरुपिण वरणे सह करिष्यमाणोद्वाहद्वारा धर्मप्रजापत्योभयकुलवंशाभिवृद्धयर्थं श्रीपरमेश्वर प्रीत्यर्थ कन्यादानमहंकरिष्ये ॥

पश्चात् कन्या पिता वर और वधु के दक्षिण हाथ में निम्न वस्तु दें ।

१. जल-शिवा आप सन्तु । सन्तु शिवापः । २. पुष्प-सौमनस्य मस्तु । अस्तुसौमनस्य । ३ अक्षत-अक्षतं चारिष्टंचास्तु । अस्त्वक्षतमरि ष्टच । ४ जल-आपःपांतु आयुष्यमस्तु । ५. गंध-गन्धापांतुसौमंगल्यचास्तु । ६. अक्षत-अक्षताः पांतु आयुष्यमस्तु । ७. पुष्प-पुष्पाणि पांतुसौश्रियमस्तु । ८ जल या चावल पृथ्वी पर त्यागना-यत्पाप रोग अशुभंकल्याण तद्दूरे प्रातहतमस्तु ।

पश्चात् कन्या पिता कन्या का दक्षिण हाथ अपने हाथ में ले ले और वर अपना हाथ कन्या पिता के नीचे रखे। उस समय तीन वार गोत्रोच्चारण करते हुए संकल्प करें।

(१) अमुक गोत्रोत्पन्नस्य अमुक शर्मणः प्रपौत्राय।

(२) ,, ,, ,, पौत्राय।

(३) ,, ,, ,, पुत्राय।

(४) ,, ,, ,, दौहित्राय।

(५) ,, ,, ,, वराय विष्णुरूपाय।

(६) अमुक गोत्रोत्पन्नस्य अमुक शर्मणः प्रपौत्रीं।

(७) ,, ,, ,, पौत्रीं।

(८) ,, ,, ,, पुत्रीं।

(९) ,, ,, ,, दौहित्रीं।

(१०) ,, ,, ,, नाम्नीं कन्यां लक्ष्मीस्वरूपिणीं।

इमां कन्यां कुलशील सौभाग्यदयादाक्षिण्यादि गुणगणयुतां सर्वावयवेषु ललितां चारोगां कांचनादिभिरुपकल्पित कुंडल कंकण कटिसूत्रांगद नूपुर मुक्ता मालादिभिर्यथाशक्त्यावाऽलंकृतां मकरंदमत्त मधुकर मुदित मालती मालां मदनफल बद्धांत्रिसातुलशुद्धां दशपुरुषविख्यातां वेदशास्त्रपुराणागमवद्धर्मरतामुप कल्पितोपस्कर सहितां प्रजापतिदैवत्यां मम श्रुतिस्मृति पुराणोक्त फल प्राप्त्यर्थं तथा च समस्त पितृणामखंड निरितिशयानन्द ब्रह्मलोकवाप्त्यादि कन्यादानाकल्पोक्त फलावाप्त्यर्थं अस्यां कन्यायामुत्पादयिष्यमाण संतत्या दशपूर्वान्दशपरान्मां चैवमेकविंशति पुरुषान्नुद्धर्त्तु कामः श्रीपरमेश्वर प्रीत्यर्थं भार्यात्वेन तुभ्यमहं सम्प्रददे॥

कन्या पिता कहे—दाताहं वरुणो राजा, द्रव्यमादित्य दैवतं विप्रोसौविष्णुरुपेण, प्रतिगृह्णात्वयं विधि ॥:

तब कन्या पिता "श्रीकृष्णार्पणमस्तु" कहकर कन्या का हाथ वर के हाथ में दे दे और तब वर कहे।

ॐ स्वस्ति ॥ ॐ द्यौस्त्वाददातु पृथिवीत्वाप्रतिगृह्णातु ॥

पश्चात् कन्या पिता गोदान का संकल्प करें।

अद्येत्यादि० कृतस्य कन्यादानस्य सांगतासिद्ध्यर्थं मिमांगांतन्निष्क्रयद्रव्यं वा यथाशक्ति दक्षिणां च तुभ्यमहं सम्प्रददे ॥

पश्चात् कन्या पिता वर से प्रार्थना करे।

यस्त्या धर्मश्चरितव्य सोनया सह।
धर्मेचार्थे च कामे च त्वयेय नाति चरितव्या ॥

तब वर कहे—नाति चरामि।

कन्या पिता कन्या से प्रार्थना करे।

कन्येममाग्रातो भूयाः कन्ये मे देविपार्श्वयोः।
कन्ये मे पृष्ठ तो भूयाः त्वद्दानामोक्षमापुन्याम्।

पश्चात् कन्या पिता वर से प्रार्थना करे।

कन्यां लक्षणसंपन्नां कनकाभरणैर्युताम्।
दास्यामिब्रह्मणे तुभ्य ब्रह्मलोक जिगीषया ॥ १ ॥

पृथिव्यादि महाभूताः साक्षिणः सर्व देवताः।
इमांकन्यां प्रदास्यामि पितृणां तारणायच ॥ २ ॥

मम वंशकुले जाता यावद्वर्षाणि पोषिता।
तुभ्यं वर मया दत्ता पुत्र पौत्र विवर्धिनी ॥ ३ ॥

गौरी कन्यामिमां विप्र यथा शक्त्या विभूषिताम् ।
गोत्राय शर्मणे तुभ्यं, दत्तां विप्र समाश्रय ॥ ४ ॥

तब कन्या माता कहे—मया पि दत्ता ।

पश्चात् वर कहे—मया प्रतिगृहीता ।

अन्त में कन्या पिता संकल्प करे ।

कृतेनाननेन कन्यादानख्यकर्मणा भगवान् श्रीबालकृष्ण प्रीयताम् ॥

८. कुशकंडिकाः—

सर्व प्रथम वर आचमन व प्राणायाम कर संकल्प करे ।

अद्येत्यादि० मम आत्मनः श्रुतिस्मृति पुराणोक्त फल प्राप्त्यर्थ प्रतिगृहीताया अस्या वध्वा भार्यत्वसिद्ध्यर्थं धर्मार्थ काम पुत्रपौत्रादि संतति वृद्ध्यर्थं विहित विधिना स्थापित योजक नामाग्नौ वैवाहिक होममहं करिष्ये ॥ १ ॥ तदंगत्वेनादौकलशाराधनं गणपति पूजन स्वस्त्युच्चारणं ब्रह्माचार्यादिग्वरुण अग्निपूजनं देवतान्वाधानं ब्रह्मासनस्तरणादि पर्युक्षणं कर्मं च करिष्ये ।

पश्चात् कलश पूजन (पृष्ठ—४) गणपति पूजन (पृष्ठ-५) स्वतिपुण्याहवाचन, पृष्ठ-९) आचार्य ऋत्विक् वरुण (पृष्ठ-२५) और कुशकंडिका (पृष्ठ-३०) से देखकर करें । उस समय "योजक नाम" अग्नि की स्थापना करें ।

९. प्रायश्चित होमः—

निम्न मंत्रों से घृत से हवन करें । और शेष भाग प्रोक्षणी पात्र में डालें ।

ॐ प्रजापतयेस्वाहा इदं प्रजापतये न मम ॥ ॐ इन्द्रायस्वाहा। इदं इन्द्राय न मम ।२॥ ॐ अग्नयेस्वाहा । इदं अग्नये न मम ॥३॥ ॐ सोमायस्वाहा इदं सोमाय न मम ॥ ४ ॥

॥ नवाहुतयः॥ ॐ भूः स्वाहा इदं अग्नये न मम ॥१॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥ २ ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ३ ॥ ॐ त्वन्नोऽ अग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो वन्हितमः शोशुचानो विश्वाद्वेषा ँ सि प्रमुमुग्धस्मत्स्वाहा ।। इदं अग्नि वरुणाभ्यां न मम ॥ ४ ॥ ॐ सत्वन्नोऽ अग्ने ऽवमो भवोतिने दिष्टोऽअस्याऽ उषसो व्युष्टौ । अवयद्वनो वरुण ँ रराणोवीहिमृडीक ँ सुहवोनऽएधि स्वाहा ॥ इदमग्नीवरूणाभ्यां न मम ॥ ५ ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्व ममाऽअसि । अयानो यज्ञं वहस्य यानो धेहि भेषज ँ स्वाहा इदं अग्नये अयसे न मम ॥ ६ ॥ ॐ ये ते शतं वरूणये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्का स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ७ ॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यम ँ श्रथाय । अथावयमादित्य व्रतेनवानागसोऽअदितयेस्याम स्वाहा ॥ इदं वरुणाय न मम ॥ ८ ॥ ॐ प्रजापतये स्वाहा इद प्रजापतये न मम ॥ ९ ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदं अग्नये न मम ॥ १० ॥

१०. अथ राष्ट्रभृत् होमः—

सर्व प्रथम विनियोग करें।

ऋताषाडित्यादिद्वादशानां प्रजापतिऋषिस्तत्तन्मंत्रोक्ता देवता यजुश्छन्दो राष्ट्रभृद्धोमे विनियोगः ॥

पश्चात् १२ आहुतियें घृत की देवें ।

ॐ ऋताषाड्ऋतधामाग्निगन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै वाहावाट् इदमग्नये गन्धर्वाय न मम ॥ १ ॥ ॐ ऋतासाड्ऋतधामाग्नि न्धर्वस्तस्यौषधयोप्सरसो मुदो नाम ताभ्यः स्वाहा । इदमौषधिभ्यो ऽप्स ोभ्यः न मम ॥ २ ॥ ॐ सँहितो विश्वासामा सूर्यो गन्धर्वः सन इदं ह्म क्षत्र पातु तस्मै स्वाहा वाट् ॥ इदं सूर्याय गन्धर्वाय न मम ॥ ३ ॥ ॐ सँहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो ाम ताभ्यः स्वाहा ॥ इदं मरीचिभ्योऽप्सरोभ्यः न मम ॥ ४ ॥ ॐ ुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व स न इद ब्रह्म क्षत्रं पातु तस्मै स्वाहा ाट् ॥ इद चन्द्रमसे गन्धर्वाय न मम ॥ ५ ॥ ॐ सुषुम्णः सूर्यरश्मिश्च-द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा ॥ इद ाक्षत्रेभ्योऽप्सरोभ्यः न मम ॥ ६ ॥ ॐ इषिरो विश्वव्यचा वातो गन्धर्वः ा न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदं वाताय गन्धर्वाय न मम । ७ ॥ ॐ इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापो अप्सरस ऊर्जो नाम ाभ्यः स्वाहा ॥ इदम् अद्भ्यो अप्सरोभ्यः न मम ॥ ८ ॥ ॐ भुज्युः सुपुर्णो यज्ञो गन्धर्वः स न इद ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदं यज्ञाय गन्धर्वाय न मम । ९ ॥ ॐ भुज्युः सुपुर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्पसरसस्तावा नाम ताभ्यः स्वाहा ॥ इद दक्षिणाभ्योऽप्सरोभ्यः न मम ॥ १० ॥ ॐ प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् । इदं मनसे गन्धर्वाय न मम ॥ ११ ॥ ॐ प्रजापतिर्विश्वकर्मा मनो गन्धर्वतस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा ॥ इदं ऋक्सामेभ्योऽप्सरसरोभ्यः एष्टिभ्य न मम ॥१२॥

११. अथ जयाहोमः–

सर्व प्रथम विनियोग करें ।

चित्तं चेत्यादिद्वादशानां परमेष्टिऋषिर्यजुश्छन्दो लिंगोक्ता दे वैवाहकर्मणि जया होमे विनियोगः ॥

पश्चात् १३ आहुतियें घृत की देवे ।

ॐ चित्तं च स्वाहा ॥ इदं चित्ताय न मम ॥ १ ॥ ॐ चितिश स्वाहा ॥ इदं चित्त्यै न मम ॥ २ ॥ ॐ आकूत च स्वाहा ॥ इदं आकूत न मम ॥ ३ ॥ ॐ आकूतिश्च स्वाहा ॥ इद आकूत्यै न मम ॥ ४ ॥ विज्ञातं च स्वाहा इदं विज्ञाताय न मम ॥ ५ ॥ ॐ विज्ञातिश्च स्वाहा इद विज्ञात्यै न मम ॥ ६ ॥ ॐ मनश्च स्वाहा ॥ इदं मनसे न मम ॥७ ॐ शक्करीभ्यो स्वाहा ॥ इदं शक्करीभ्यो न मम ॥ ८ ॥ ॐ दर्श स्वाहा ॥ इदं दर्शाय न मम ॥ ९ ॥ ॐ पौर्णमासं च स्वाहा ॥ इद पौण मासाय न मम ॥ १० ॥ ॐ बृहच्च स्वाहा ॥ इदं बृहते न मम ॥ ११ ॐ रथन्तर च स्वाहा ॥ इदं रथन्तराय न मम ॥ १२ ॥ ॐ प्रजापतिर्जय निन्द्रायवृष्णो प्रायच्छदुग्रः पृतना जयेषु । तस्मै विशः समनमन्त सव स उग्रः स इ हव्यो बभूव स्वाहा ॥ इद प्रजापतये न मम ॥ १३ ॥

१२. अथ अभ्यातान होमः–

सर्व प्रथम विनियोग करें ।

ॐअग्निभूतानामित्याद्यष्टायशानां प्रजापतिर्ऋषिस्त्रिष्टुप छन्दस न्मंत्रोक्तादेवता अभ्यातन होमे विनियोगः ॥

पश्चात् १८ आहुतियें घृत की देवे।

ॐ अग्निभू ᳐तानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रे ऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां ᳐ स्वाहा ॥ इदमग्नये न मम ॥ १ ॥ ॐ इन्द्रो ज्येष्टानामधिपति * इदं इन्द्राय ज्येष्ठाना अधिपतये न मम ॥ २ ॥

पश्चात् वर वधु के मध्य अन्तर पट देकर आहुति दें।

ॐ यमः पृथिव्या अधिपति............ इद यमाय पृथिव्या अधिपतये न मम ॥ ३ ॥

पश्चात् अन्तर पट हटाकर प्रणीता पात्र का जल कान और आँखों पर लगावें। फिर आहुति दें।

ॐ वायुः अन्तरिक्षस्याधिपति........इदं वायवेऽन्तरिक्षस्याधिपतये न मम ॥ ४ ॥ ॐ सूर्यो दिवोधिपति........इदं सूर्याय दिवोधिपतये न मम ॥ ५ ॥ ॐ चन्द्रमा नक्षत्राणामधिपतिः........इदं चन्द्रमसे न मम ॥ ६ ॥ ॐ बृहस्पतिर्ब्रह्मणोधिपतिः........इदं बृहस्पतये ब्रह्मणोऽधिपतिये न मम ॥ ७ ॥ ॐ मित्रः सत्यानामधिपतिः........इदं मित्राय सत्यामधिपतये न मम ॥ ८ ॥ ॐ वरुणोऽपानां ᳐ अधिपतिः ...इदं वरुणाय अपानां अधिपतये न मम ॥ ९ ॥ ॐ समुद्रः स्रोत्यानामधिपतिः........इदं समुद्रायस्रौतानामाधिपतये न मम ॥१०॥ ॐ अन्न ᳐ साम्राज्यानामधिपतिः तन्मावतु....अन्नाय साम्राज्यानामधिपतये न मम ॥ ११ ॥ ॐ सोमः औषधीनामधिपतिः........इदं सोमाय औषधीनायधिपतये न मम ॥ १२ ॥ ॐ सविता प्रसवानामधिपतिः........इदं सवित्रे प्रसवानामधिपतये न मम ॥ १३ ॥

---

* समस्त रिक्त स्थानों पर प्रथम मंत्र के रेखांकित शब्दों की पुनरावृति करें।

पश्चात् अन्तर पर देकर आहुति दें ।

ॐ रुद्रः पशूनामधिपतिः........इदं रुद्राय पशूनामधिपतये न मम ॥ १४ ॥

पश्चात् अन्तर पट हटाकर प्रणीता पात्र का जल कान व आंखों पर लगावें फिर आहुति दें ।

ॐ त्वष्टारूपाणामधिपतिः........इदं त्वाष्ट्रे रूपाणामधिपतये न मम ॥ १५ ॥ ॐ विष्णुः पर्वतानामधिपतिः........इदं विष्णवे पर्वतानामधिपतये न मम ॥ १६ ॥ ॐ मरुतो गणानामधिपतयस्ते मावन्तु.... इदं मरुद्भ्यो गणानामधिपतिभ्यः न मम ॥ १७ ॥

पश्चात् अन्तरपट देकर आहुति दें ।

ॐ पितर पितामहाः परे वरे ततास्ततामहाः। ते मावन्त्वस्मिन्ब्रह्म एयस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां दे स्वाहा । इदं पितृभ्यः न मम ॥ १८ ॥

१३ पंचाहुतयः—

सर्व प्रथम विनियोग करें ।

अग्निरैत्वित्यादि पचानां प्रजापतिर्ऋषि रंतिमस्य सकर्षण देवताः चतुर्थस्य वैवस्वतोदेवता पंचमस्य मृत्युर्देवता त्रिष्टुप्छन्द विनियोगः ॥

पश्चात् घृताहुति दें ।

ॐ अग्निरेतु प्रथमो देवतानां सोऽस्यै प्रजां मुञ्चतु मृत्यु तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघन्नरोदात् इदमग्नये न मम ॥ १ ॥ ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्

र्वमायुः । अशुन्योपस्था जीवतामस्तु माता पोत्रमानन्दमभिविबुध्यतामियं स्वाहा ॥ इदमग्नये न मम ॥ २ ॥ ॐ स्वस्ति नो अग्ने दिव आपृथिव्या विश्वानिधेह्ययथा यजत्र । यदास्यां मयिदिविजात प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा ॥ इदमग्नये न मम ॥ ३ ॥

पश्चात् अन्तर पट देकर होम करें ।

ॐ सुगन्न पन्थां प्रदिशन्न एहि ज्योतिष्मद्धे ह्यजरन्न आयुः । अपैतु मृत्युमृतंम आगाद्वैवस्वतो नो अभय कृणोतु स्वाहा ॥ इद वैवस्वताय न मम ॥ ४ ॥ ॐ पर मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देव यानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा ॥ इद मृत्यवे न मम ॥ ५ ॥

पश्चात् अन्तर पट हटाकर प्रणीता पात्र के जल को कान व आखों पर लगावें ।

१४. लाजा होमः–

सर्व प्रथम विनियोग करें ।

अर्यमणमित्यादि त्रयाणामाथर्वणर्षि स्त्रिष्टुप्छन्दस्तृतीयस्या-नुष्टुप्छन्दाग्निर्देवता लाजहोमे विनियोगः ।

वर–वधु खड़े होवें, वधु आगे होवे। वधू की अंजलि करावे, वधु के हाथों के नीचे वर अंजलि करे। आचार्य सेके हुवे चावलों को बांस के छाज में डाल कर घृत मिलावे, चावलों के चार भाग करे। छाज को वधु के भाई के हाथ में देवे। वधु का भाई छाज में से चावलों के तीन भाग करे और इन तीन भागों को नीचे लिखे ३ मंत्रों से अग्नि में होम करें।

ॐ अर्यमणं देवं कन्याऽग्निमयक्षत । सनो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा ॥ इदं अर्यमणे देवाय न मम ॥१॥ ॐ इयं नार्युपब्रूते लाजानावपन्तिका । आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥ इदमग्नये न मम ॥ २ ॥ ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव । मम तुभ्यं च संवननं तदग्निरनुमन्यतामियं स्वाहा ॥ इदं अग्नये न मम ॥ ३ ॥

वर वधु के दाहिने हाथ को अंगूठे सहित पकड़े और ये मंत्र पढ़े:—

ॐ गृभ्णामि ते सौभगत्वाय हस्तं मयापत्या जरदष्टिर्यथा सः । भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः ॥ १ ॥ ॐ अमोहमस्मि सा त्वं सा त्वमस्यमोऽहम् ॥ सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वम् ॥ २ ॥ ॐ तावेव विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विन्द्यावहै बहून् । ३ ॥ ते सन्तु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ । पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम् ॥ ४ ॥

पश्चात् वधू दाहिना पैर शिला पर रखे ।

आरोहेममश्मानमश्मेव त्वं स्थिरा भव । अभितिष्ठ पृतन्यतोऽवबाधस्वा पृतानायतः ॥

वधू का पैर शिला पर ही रहे, तब वर यह गाथा पढ़े—

ॐ सरस्वति प्रेदमव सुभगे वाजिनीवती । यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः ॥ यस्यां भूतं समभवद्यस्यां विश्वमिदं जगत् । तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ॥

फिर वधू को वर से आगे कर के दोनों को अग्नि की परिक्रमा करावे और ब्राह्मण मन्त्र पढ़े—

ॐ तुभ्यमग्ने पर्य्यवहन्सूर्यां वहतु ना साह । पुनः पतिभ्यों जायां दाग्ने प्रजया सह ॥

फिर दोनों अपने आसन पर बैठ जावें और भ्राता अग्नि तीन वार अपने हाथ तपाकर वधु के मस्तक पर रखे ।

(नोटः—उपरोक्त सम्पूर्ण क्रिया भ्राता के बाद काका और मामा के द्वारा की जाय । तीसरे फेरे के बाद वर—वधु अपना आसन बदल कर बैठेंगे, और पुनः अपने २ आसन पर बैठेंगे ।

पश्चात् चौथे फेरे पर कन्या पिता केवल निम्न आहुति करावे ।

ॐ भगाय स्वाहा इद भगाय न मम ।

पश्चात् वर वधु का हाथ ग्रहण कर पहले वर पीछे वधु इस प्रकार अग्नि की परिक्रमा करे । यह क्रिया बिना मंत्र होगी ।

पश्चात् वर निम्न मन्त्र से एक घृताहुति देवे ।

ॐ प्रजापये स्वाहा इदं प्रजापतये न मम ।

१५. सप्तांचल पूजनः—

सर्व प्रथम वर संकल्प करे ।

अद्येत्यादि गुणविशेषण विशिष्टायां शुभ पुण्यस्तिथौ मम प्रति गृहीत कन्या पतित्व सिद्ध्यर्थं सप्तांचल पूजनमहं करिष्ये ॥

पश्चात् अग्नि के उत्तर में चावलों की सात ढिगलियाँ बनावें । फिर निम्न मंत्र से वर उनका गन्धादि पूजन करे ।

ॐ प्रतिपदसिप्रतिपदेत्वानुपदस्य अनुपदेत्वा सम्पदसिसंपदेत्वा तेजसितेजसेत्वा ॥

पश्चात् वह निम्न सात मंत्रों से वधु के दाहिने पैर द्वारा सातों ढिगलियों का विसर्जन करवावे ।

ॐ एकमिषे विष्णुस्त्वानयतु ॥ १ ॥ ॐ द्वे ऊर्जे विष्णुस्त्वानयतु ॥ २ ॥ ॐ त्रीणीरायस्पोषायविष्णुस्त्वानयतु ॥ ३ ॥ ॐ चत्वारिमायोभवायविष्णुस्त्वानयतु ॥ ४ ॥ ॐ पंचपशुभ्योविष्णुस्त्वानयतु ॥ ५ ॥ ॐ षड्ऋतुभ्योविष्णुस्त्वानयतु ॥ ६ ॥ ॐ सखे सप्तपदा भव सामामनुव्रता भव विष्णुस्त्वानयतु ॥ ७ ॥

॥ कन्या प्रतिज्ञा ॥ :X:

त्वत्तो मेऽखिलसौभाग्य पुण्यैस्त्वं विविधैः कृतैः ॥
देवैः संपादितो मह्यं वधूराद्य पदेऽब्रवीत् ॥ १ ॥
कुटुंबं पालयिष्यामि ह्यावृद्धबालकादिकम् ॥
यथालब्धेन संतुष्टा ब्रूते कन्या द्वितीयके ॥ २ ॥
मिष्टान्नव्यञ्जनादीनि काले संपादये तव ॥
आज्ञासंपादिनी नित्यं तृतीये साऽब्रवद्वरम् ॥ ३ ॥

॥ कन्या प्रतिज्ञा ॥ :X:

तुमहि मेरा अखिल सुहाग हो, तुम्हिं मेरा पुण्य सुपुंज हो ।
दैव ने मुझको तुझको दिया, वधु बनी तव चरणागत रहूं ॥१॥
पालती रहूंगी स्व-कुटुम्ब को जब तलक वृद्धायु न आ डटे ।
बन रहूँ सन्तोषि तव आय पर, द्वि-फेरे में यह प्रण ले रही ।२॥
मधुर व्यजन जो तुम दे सको, नहीं मेरा मोद प्रमोद हो ।
मम गति तव आशावत् रहे, सुन्दरता मेरी तव सुखद हो ॥ ३ ॥

शुचिः शृङ्गारभूषाऽहं वाङ्मनःकायकर्मभिः ॥
क्रीडिष्यामि त्वया सार्धं तुरीये साऽब्रवीदिदम् ॥ ४ ॥
दुःखे धीरा सुखे हृष्टा सुखदुःखविभागिनी ॥
नाहं परनरं गच्छे पञ्चमे साऽब्रवीत्पतिम् ॥ ५ ॥
सुखेन सर्वकर्माणि करिष्यामि गृहे तव ॥
सेवां श्वशुरयोश्चापि बन्धूनां सत्कृतं तथा ॥
यत्र त्वं वा ह्यहं तत्र नाहं वञ्चे प्रियं क्वचित् ॥
नाहं प्रियेण वञ्चयाऽस्मि कन्या षष्ठे पदेऽब्रवीत् ॥ ६ ॥
होमयज्ञादिकार्येषु भवामि च सहायकृत् ॥
धर्मार्थकामकार्येषु मनोवृत्तानुसारिणी ॥
सर्वे च साक्षिणस्त्वं मे पतिभूतोऽसि सांप्रतम् ॥
देहो मयाऽर्पितस्तुभ्यं सप्तमे साऽब्रवीद्वरम् ॥ ७ ॥

वसन, भूषण, कार्य सदैव ही, विचरण तव इच्छायुत रहे।
सम समुद्भव हो तेरे लिये, चतुर्थ फेरे में प्रणवति बनी ॥ ४ ॥
विपद धीरज, गर्व न सुख लहुँ, हूँ तुम्हारी सुख दुख भागिनी ॥
पर पुरुष सपन हुँ देखूं नहीं, सुखद कार्य सभी मेरे रहें ॥ ५ ॥
ससुर की सेवा करती रहुं, परिजनों की बन परचायिका,
सुकृत तव हित हों मेरे सभी, दृढ़, प्रतिज्ञा है मेरी यही ॥ ६ ॥
जहाँ तुम हो वहाँ मैं हूँ बसी, यज्ञ हवनादि शुभ कार्य में ।
अर्धअंगिनी बन सहयोगिनी, धर्म अर्थ अरु काम प्रवृत्तिनी ॥
तुम्हहि में अपना सब देयकर, तुम्हहि में सर्वस अर्पित करुँ ।
वर-वधु वचनावद्ध हो रहे, ग्रहण कर कर में कर ले लिया ॥ ७ ॥

❋ वर कामना ❋

मदीयचित्तानुगतं च चित्तं, सदा मदाज्ञापरिपालनं च ।
पतिव्रता धर्मपरायणा त्वं, कुर्या सदा सर्वमिमं प्रयत्नम् ॥

प्रेम्णा त्वां पालयिष्यामि, निश्चिन्ता भव सर्वथा ।
सुखे दुःखे सदा नूनं वसिष्यामि त्वया सह ॥ २ ॥
वस्त्रभूषादिके कार्ये, स्वातन्त्र्यं ते भविष्यति ।
त्वदिच्छानुसृतिः कार्या, मया वै न्यायसंगिता ॥ ३ ॥
न इच्छामि पर स्त्रीं तु न भक्ष्याभक्ष्य भोजनम् ।
स्नेहेन पालयिष्यामि, परित्यक्त्वा कदापि न ॥ ४ ॥
त्यक्त्वा त्वां करिष्यामि, यज्ञादिकं कदापि न ।
तीर्थे देशाटने प्रेम्णा, चलिष्येऽहं त्वया सह ॥ ५ ॥
उद्यानादि विहारौ वै, करिष्याव उभौ सह ।
भोजनादिष्वपि चैव, त्वद्रुचिर्हि चलिष्यति ॥ ६ ॥
वामाङ्गे ते परित्यागः, करिष्यामि कदापि न ।
आशासे वै सदा मे तु, भवतात् सुखदायिनी ॥ ७ ॥

❋ वर कामना ❋

सुमुखि ! तुम अपने उर में सदा, मम स्वरूप विलोकित कीजिये ।
औ, सदा पालन करती रहो, नित बनी रह आज्ञाकारिणी ॥
पति व्रता बन कर सहचारिणी, धर्म के पथ पर चलती रहो ।
जो सुखद कृत हों मुझको सदा, तुम वही भर सक करती रहो ॥

पश्चात् विनियोग करें।

शिवा आपः इति मंत्रस्य प्रजापतिर्ऋषिर्लिंगोक्तादेवता सुप्रतिष्ठा छन्दः ॥ आपोहिष्ठेति तिसृणां सिंधुद्वीपऋषिर्गायत्रीछन्द आपोदेवता मूर्द्धाभिषेके विनियोगः ॥

पश्चात् वर पूजित कलश के जल से प्रथम मंत्र से पत्नी का अभिषेक करे। और शेष मंत्रों से स्वयं को छींटे लगावे।

ॐ आपः शिवाः शिवतमाः शांता शांततमास्तास्ते कृण्वन्तुभेषजम् ॥ १ ॥
ओम् आपोहिष्ठा मयोभुवस्तानऽऊर्ज्जेदधातन। महेरणाय चक्षसे ॥२॥
ओम् योवः शिवः तमोरसस्तस्यभाजयते हनः। उशतीरिवमातरः ॥ ३ ॥
ओम तस्माऽअरङ्गमामवो यस्यक्षयायाजिन्वथ। आपोजन यथा चन ॥४॥

पश्चात् वर वधु को ध्रुव तारा दिखावे।

ओम ध्रुवमसि ध्रुवं त्वा पश्यामि। ध्रुवधिपोष्ये मयि मह्यं त्वादाद् बृहस्पतिर्मया पत्या प्रजापती संजीव शरदं शतम् ॥

पश्चात् वर अपना दाहिना हाथ वधु के हृदय पर रखे।

ॐ मम व्रते ते हृदय दधामि। मम चित्तमनुचित्तं ते अस्तु। मम वाचमेकमना जुषस्व। प्रजापतिष्ट्वा नियुनक्तु मह्यं।

पश्चात् वर अपना दहिना हाथ वधु के सिर पर रखे।

ॐ सुमंगलीरियं वधूरिमा ँ समेत पश्यत।
सौभाग्यमस्यै दत्वा याथास्तं विपरेतन ॥

१६. पूर्णाहुतिः—

सर्व प्रथम घृताहुति दें। शेष भाग प्रोक्षणी पात्र में डालें।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम ॥

पश्चात् संश्रव प्राशन कर ब्रह्मा को पूर्ण पात्र दान हेतु संकल्प करें।

कृतस्यैतस्य वैवाहिक होमस्य सांगतासिद्धयर्थं कृताकृत वेक्षण ब्रह्म कर्मणः प्रतिष्ठार्थं इदं पूर्णपात्रं प्रजापति दैवतं अमुक गोत्राय अमुक शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

पश्चात् ब्रह्मा की गांठ खोल दें और प्रणीता पात्र से छींटे लगावें।

ॐ सुमित्रियान ऽआप ऽओषधयः सन्तु।

पश्चात् प्रणीता पात्र को ईशान कोण में उल्टा कर दें।

ॐ दुर्मित्रियास्तस्मैसन्तुयो ऽस्मान्द्वेष्टियंचवयंद्विष्मः।

पश्चात् परस्तरण घृत में डुबोकर अग्नि में डाल दें।

ॐ देवागातु विदोगातु वित्वागातुमित। मनसस्पत ऽइम देव ः स्वाहा वातेधाः स्वाहा।

पश्चात् पूर्णाहुति दें।

ओम् मूर्द्धान दिवो अरतिं पृथिव्या वैश्वानरमृतआजातमग्निं कवि ँ सम्राजमतिथिंजनानामासन्ना पात्र जनयन्तदेवाः स्वाहा॥

पश्चात् निम्न रूप से भस्म से तिलक दें।

ओम् त्र्यायुषं जमदग्ने (ललाट), कश्यपस्य त्र्यायुषम् (ग्रीवा) यद्देवेषु त्र्यायुषम (भुजा) तन्नो अस्तु त्र्यायुषम् (हृदय)।

पश्चात् वर-वधू दक्षिणा व नारियल अग्नि के समीप दक्षिणा के रूप में रखें।

श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धि बलं श्रियम्।
आयुष्यं तेज आरोग्यं, देहि मे हव्यवाहन॥

पश्चात् आचार्य वर-वधू को आशीर्वाद देवे ।

सदा शुभं भूयात् । दम्पत्योरविच्छिन्ना प्रीतिरस्तु । वंशाभिवृद्धिरस्तु । आयुष्मन्तौ लक्ष्मीवन्तौ पुत्रवन्तौ भवेताम् ।

पश्चात् वर संकल्प करें ।

अस्य विवाह होमकृतस्य विधेर्यन्न्यूनातिरिक्त तत्सर्वं भवतां ब्राह्मणानां वचनात् श्रीयज्ञदेव प्रसादात् सर्वं विधेः परिपूर्णमस्तु ॥इति॥

१६. पालिता प्रतिपालिता–

नोटः– विवाह के उपरान्त कन्या पिता वर पिता से कन्या के पालने की प्रार्थना करे और वर पिता पालने की प्रतिज्ञा करता है उसे 'पालिता प्रतिपालिता' कहते है ।

सर्व प्रथम गोत्रोच्चारण (पृष्ठ-७५) से करें । पश्चात् कन्या पिता कर बद्ध होकर वर पिता से प्रार्थना करे ।

एतावत्वर्ष पर्यन्तं, पुत्रवत् पालिता मया ।
इदानीं तव पुत्राय, दत्ता स्नेहेन पालिता ॥ १ ॥
गृह सरक्षणार्थं तु, मया दत्ता सदा तव ।
आशास्यते भवाद्भिश्च, स्नेहेन प्रतिपालिता ॥ २ ॥

पश्चात् वर पिता उत्तर देवे ।

धन्याः वैवाहिकाः सन्तु, कन्या दत्ता सुलक्षिणी ।
कुलवृद्धि करेयं तु, सुख सौभाग्यकांक्षिणी ॥ १ ॥
सुखवृद्धि करा येषा, स्नेह सिक्ता सदा मम ।
विप्र साक्ष्यं प्रतिज्ञाऽस्तु, स्नेहेन प्रतिपालिता ॥ २ ॥

२० चतुर्थी कर्मः—

सर्व प्रथम आचमन व प्राणायाम कर संकल्प करें।

अद्येत्यादि० मम अस्याः पत्न्याः भार्यात्व सिद्धयर्थं चतुर्थी कर्म करिष्ये ॥१॥ तदंगत्वेन गणपति पूजन ब्रह्मादि वरण दिग्ररक्षणं पंचगव्य करणं अग्निस्थापनं च करिष्ये।

पश्चात् वरुण पूजन (पृष्ठ–४), गणपति पूजन (पृष्ठ–५) और अग्निस्थापन व कुशकंडिका (पृष्ठ- २५ और ३०) से करें। पश्चात् वधु दुध व चावल का खीर स्थापित अग्नि पर बनावें। तदनन्तर घृत से आहुति दें। शेष भाग प्रोक्षणी पात्र में डालें।

ॐ प्रजापये स्वाहा इदं प्रजापतये न मम ॥ १ ॥ ॐ इन्द्राय स्वाहा इद इन्द्राय न मम ॥ २ ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ ३ ॥ ॐ अग्नये स्वाहा इदं अग्नये न मम ॥ ४ ॥ ॐ अग्नेप्रायश्चित्तेत्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा। इदमग्नये न मम ॥ ५ ॥ ॐ वायो प्रायश्चित्तेत्व देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि यास्यंप्रतिघ्नी तनूस्तामस्यै नाशय स्वाहा। इद वायवे न मम ॥ ६ ॥ ॐ सूर्य०..........:❀: इदं सूर्याय न मम ॥ ७ ॥ ॐ चन्द्र०..........:❀:इद चन्द्रमसे न मम ॥ ८ ॥ ॐ गंधर्व०..........:❀: गधर्वाय न मम ॥ ९ ॥

पश्चात् स्थाली पाक (खीर) से आहुति दें।

ॐ प्रजापये स्वाहा इद प्रजापतये न मम ॥ १ ॥ ॐ अग्नयेस्विष्टकृते स्वाहा इद अग्नये स्विष्ट कृते न मम ॥ २ ॥

❀ मन्त्र क्रमांक ६ के रेखांकित पंक्ति की पुनरावृत्ति करें।

पश्चात् घृत से आहुति दें। शेष भाग प्रोक्षणी पात्र में डालें।

नवाहुतयः॥ ॐ भूः स्वाहा इदं अग्नये न मम ॥१॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥ २ ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ३ ॥ ॐ त्वन्नोऽ अग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो वन्हितमः शोशुचानो विश्वाद्वेषा ँ सि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदं अग्नि वरुणाभ्यां न मम ॥ ४ ॥ ॐ सत्वन्नोऽ अग्ने ऽवमो भवोतिने दिष्टोऽअस्याऽ उषसो व्युष्टौ। अवयक्ष्वनो वरुण ँ रराणोवीहिमृडीक ँ सुहवोनऽएधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥ ५ ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्व ममाऽअसि। अयानो यज्ञं वहस्य यानो धेहि भेषज ँ स्वाहा इद अग्नये अयसे न मम ॥ ६ ॥ ॐ ये ते शतं वरुणये सहस्रं यज्ञियाः पाशा विततामहान्तः तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्का स्वाहा ॥ इद वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ७ ॥ ॐ उदुत्तमं वरुणं पाशमस्मदवाधमंविमध्यम ँ श्रथाय। अथावयमादित्य व्रतेतवानागसोऽअदितयेस्याम स्वाहा ॥ इदं वरुणाय न मम ॥ ८ ॥ ॐ प्रजापतये स्वाहा इद प्रजापतये न मम ॥९॥

पश्चात् संश्रव प्राशन कर ब्रह्मा को पूर्ण पात्र दान करें। फिर ब्रह्मा की गांठ खोल दें और प्रणीता पात्र से छींटे लगावें।

ॐ सुमित्रियानऽआपऽओषधयः सन्तु ॥

पश्चात् प्रणीता पात्र को ईशान कोण में उल्टा कर दें।

ॐ दुर्मित्रियास्तस्मै सन्तु यो ऽस्मान्द्वेष्टि यञ्चवयं द्विष्म ॥

पश्चात् परस्तरण घृत में डुबोकर अग्नि में डाल दें।

ॐ देवागातु विदोगातु त्विवागातुमित। मन सस्पत इमं यज्ञँ स्वाहावातेधाः स्वाहा॥

पश्चात् प्रणीता पात्र का जो पानी भूमि पर गिरा है, उ जल से वर, वधु का अभिषेक करे।

ॐ यातेपतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी निन्दितातनूर्जारघ्नं तएनांकरोमि साजीर्य त्व मया सहासुकिदेवि॥

पश्चात् पति-पत्नी स्थाली पाक (खीर) एक दूसरे व खिलावें।

ॐ प्राणैस्ते प्राणान्संदधाम्यस्थिभिरस्थीनिमाँ सैर्माँ सां त्वचा त्वचम्॥

पश्चात् पूर्णाहुति दें।

ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानर मृत आजातमग्नि कविँ सम्राजमतिथिंजनानामासन्नापात्रं जनयंत देवाः स्वाहा॥

पश्चात् निम्न रूप से भस्म का तिलक दें।

ॐ त्र्यायुषं जमदग्नेः (ललाट), कश्यपस्य त्र्यायुषम् (ग्रीवा), यद्दे षु त्र्यायुषम् (भुजा), तन्नो अस्तु त्र्यायुषम् (हृदय)॥

पश्चात् ब्राह्मण दक्षिणा व ब्राह्मण भोजन का संकल्प करें।

॥ इति संस्कार प्रदीपे द्वितीयं प्रकरणं समाप्तम्॥

॥ अथ संस्कार प्रदीपस्य तृतीयः प्रकरणः प्रारम्भः ॥

१. मूलादि नक्षत्र शान्ति प्रयोगः-

सर्व प्रथम आचमन व प्राणायाम कर संकल्प करें।

अद्येत्यादौ० ममास्य बालकस्य कुमार्या वा मूलज्येष्ठाश्लेषामघा चरणादि जनन सूचित सर्वारिष्ट विनाशार्थं शुभफल प्राप्त्यर्थं श्रीपरमेश्वर प्रीत्यर्थं सनवग्रहमखां मूलज्येष्ठाश्लेषामघा जनन शान्तिं करिष्ये ॥ १ ॥ तदङ्गभूत गणपति पूजनं पुण्याहवाचनं मातृका पूजनं वसोर्द्धारां नान्दीश्राद्धं ब्राह्मणवरणं पंचगव्यकरणं भूमिपूजनमग्निस्थापनं च करिष्ये ॥ २ ॥

पश्चात् गणपति पूजन से नान्दी श्राद्ध तक सम्पूर्ण क्रिया करने के उपरान्त अग्नि के पूर्व में पांच कलश स्थापित करें। कलश स्थापन की विधि स्वतिपुण्याह वाचन के अन्तर्गत दी गई है। मध्य कलश पर स्वर्णमयी रुद्र की मूर्ति स्थापित करें। और उनका षोडषोपचार पूजन करें।

पश्चात् २७ नक्षत्रों का आव्हान व पूजन करें।

मूलनक्षत्राधिष्ठित निऋते इहा गच्छ इह तिष्ठ ॥ १ ॥ ज्येष्ठाधिष्ठित इन्द्र इहा० ॥२॥ पूर्वाषाढाधिष्ठित वरुण इहा० ॥३॥ उत्तराषाढाधिष्ठित विश्वेदेवा इहा० ॥ ४ ॥ श्रवणाधिष्ठित विष्णो इहा० ॥ ५ ॥ धनिष्ठाधिष्ठिता अष्ट वसवः इहा० ॥ ६ ॥ शतभिषाधिष्ठित वरुण इहा० ॥ ७ ॥ पूर्वाभाद्रपदाधिष्ठित अजैकपाद् इहा० ॥ ८ ॥ उत्तराभाद्रपदाधिष्ठित अहिर्बुध्न्य इहा० ॥ ९ ॥ रेवत्येधिष्ठित पूषन् इहा० ॥ १० ॥

अश्वन्यधिष्ठित अश्विनौ इहा० ॥ ११ ॥ भरण्यधिष्ठित यम इ
॥ १२ ॥ कृतिकाधिष्ठित अग्ने इहा० ॥ १३ ॥ रोहिण्यधिष्ठित प्रजा
इहा० ॥ १४ ॥ मृगशीर्षाधिष्ठित सोम इहा० ॥ १५ ॥ आर्द्राधिष्ठित
इहा० ॥ १६ ॥ पुनवर्स्वधिष्ठित अदिते इहा० ॥ १७ ॥ पुष्याधि
बृहस्पते इहा० ॥ १८ ॥ आश्लेषाधिष्ठित सर्प इहा० ॥ १६ ॥ मघाधि
पितरः इहा० ॥ २० ॥ पूर्वाफाल्गुन्याधिष्ठित भग इहा० ॥ २१ ॥ उत्त
फाल्गुन्याधिष्ठत अर्यमन्निहा इहा० ॥ २२ ॥ हस्ताधिष्ठित सूर्य इहा
॥ २३ ॥ चित्राधिष्ठित त्वष्टः इहा० ॥ २४ ॥ स्वात्याधिष्ठत वायो इहा
॥ २५ ॥ विशाखाधिष्ठतौ इद्राग्नी इहा० ॥ २६ ॥ अनुराधाधिष्ठत मि
इहा गच्छ इह तिष्ठ ॥ २७ ॥

पश्चात् नवग्रह पूजन, दशादिग्पाल आव्हान व अग्नि स्थापन कर पूर्वांग में वर्णित समस्त होम कर्म करने के उपरान्त निम्न नाम मंत्रों से होम करें।

निऋतये स्वाहा (१०८ वार)। इन्द्राय स्वाहा (२८)। वरुणाय स्वाहा (२८), विश्वेभ्ये देवेभ्यः (८)। विष्णवे०। वसुभ्यः। वरुणाय। अजैकपादाय। अहिबुर्धनाय। पूष्णे। अश्विभ्यां। यमाय। अग्नये। प्रजापतये। सोमाय। रुद्राय। अदितये। बृहस्पतये। सर्पाय। पितृभ्यः। भगाय। अर्यम्णे। सवित्रे। त्वष्टे। वायवे। इन्द्राग्निभ्यां। मित्राय।

पश्चात् पायस (खीर) में तिल डालकर निम्न नाम मंत्रों से ८-८ वार होम करें।

निऋतये। सवित्रे। दुर्गायै। वास्तोस्पतये। अग्नये। क्षेत्राधिपतये। मित्रावरुणाभ्यां। अग्नये। चरु होम-श्रियै स्वाहा। पायस होम-सोमाय स्वाहा। घृताहुति- रुद्राय स्वाहा।

पश्चात् पूर्वांग के अनुसार पूर्णाहुति आदि कार्य करें। तदनन्तर २७ कूप के जल में २७ प्रकार की औषधियां डालकर उसे १०० छिद्रों के कुंभ में डालकर माता-पिता सहित बालक का अभिषेक करें।

ॐ आपोहिष्ठा मयोभुवस्तान ऊर्जेदधातन। महेरणाय चक्षसे ॥ १ ॥ योवः शिवः तमो रसः तस्यभाजयते हनः। उशतीरिवमातरः॥ २ ॥ तस्मा अरंग मामवो यस्य क्षयाय जिन्वथ आपोजन यथा च न ॥ ३ ॥ यो ऽसौ वज्रधरो देवो महेन्द्रो गजवाहनः। मूल :×: जात शिशोर्दोषं माता पित्रोर्व्यपोहतु ॥ ४ ॥ सुरास्त्वामभिषिचन्तु ब्रह्मविष्णु महेश्वराः। वासुदेवो जगन्नाथस्तथा संकर्षणो प्रभु ॥ ५ ॥ यन्ते केशपुर्दौर्भाग्यं सीमन्ते यच्च मूर्धनि। ललाटे कर्णयो रक्ष्णोरापो निघ्नतु ते सदा ॥ ६ ॥

पश्चात घृतपूर्ण कांस्य पात्र में स्वर्ण डालकर माता-पिता बालक अपना मुख उसमें देखें और वह पात्र ब्राह्मण को दान में दे दें। पश्चात् देवताओं का विसर्जन कर ब्राह्मण भोजन करावें ॥ इति ॥

२. कूष्मांडी होम:—

नोट:—किसी भी विवाहादि शुभ कार्य में अशौचादि कोई विघ्न होने पर "कूष्मांडी होम" किया जाय।

सर्व प्रथम सपत्नीक यजमान आचमन व प्राणायाम कर संकल्प करे।

:×: "मूल" शब्द के स्थान पर जिस नक्षत्र की शान्ति करनी हो वह शब्द प्रयोग करें यथा— ज्येष्ठा, आश्लेषा, मघा, आदि।

देशकालौ स्मृत्वा० अस्य संस्कारस्य सन्निहित मूहुर्तं तरा लाभ द्यति संकटवेशनाशौच मध्ये ऽमुक सस्कार कर्मणाधिकार सिद्धयर्थ प्राय श्चितीभूत कूष्मांडी होमं गोदानं पंचगव्यप्राशनं च करिष्ये ॥ १। तत्रादौ विघ्नविनाशार्थं गणपति पूजनं करिष्ये ॥ २ ॥

पश्चात् गणपति पूजन (पृष्ठ-५) और अग्नि स्थापन व कुशकंडिका (पृष्ठ-२५ व ३०) से करें। तदन्तर घृताहुति दें।

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम ॥ १ ॥ ॐ इन्द्राय० । २ ॥ ॐ अग्नये० ॥ ३ ॥ ॐ सोमाय० ॥ ४ ॥ ॐ यद्देवादेवहेडनं देवासश्चकृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः स्वाहा। इदं अग्नये न मम ॥५॥ ॐयदि दिवा यदि नक्तमेना ँ सिचकृमा वयम्। वायुर्मातस्मादेनसो विश्वान्मुञ्च त्व ँ हसः स्वाहा। इद वायवे न मम ॥ ६ ॥ ॐ यदि जाग्रद्यदिस्वप्न ऽएना ँ सि चकृमा वयम्। सूर्यो मातस्मादेनसो विश्वान्मुञ्चत्व ँ हसः स्वाहा इद सूर्याय न मम ॥ ७ ॥

पश्चात नवाहुति (पृष्ठ-८८) के मंत्रों से होम करें।

पश्चात् संश्रव प्राशन आदि कर होम कर्म पूर्ण करने के उपरान्त गोदान का संकल्प करें।

देशकालौ स्मृत्वा० इमां यथा शक्त्यालंकृतां पयस्विनीं गामाशौचदोष निरसन पूर्वक प्राप्तकर्मकरणाधिकारार्थं अमुक गोत्राय अमुक शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ १ ॥ गोदान प्रतिष्ठा सिद्धयर्थं मिमां यथा शक्ति दक्षिणां तुभ्यमहं सम्प्रददे ॥ २ ॥

पश्चात् गाय की प्रार्थना करे।

गवामंगुषु तिष्ठन्ति भुवनानि चतुर्दश।
यस्मात्तस्माच्छिवमेस्यादिह लोके परत्र च ॥

पश्चात् पंचगव्य का प्राशन करें।

यत्त्वगस्थित पापं देहे तिष्ठति मामके।

प्राशानात्पञ्चगव्यस्य दहत्यग्निरिवेंधनम् ॥

पश्चात् यथा शक्ति ब्राह्मण भोजन का संकल्प करें ॥इति॥

३. श्री शान्तिः—

(नोटः— किसी भी संस्कार कार्य में यजमान पत्नी और विवाह संस्कार में कन्या के रजस्वला होने पर "श्री शान्ति" की जाय)

सर्व प्रथम यजमान आचमन व प्राणायाम कर संकल्प करें।

अद्येत्यादि० अस्य संस्कारमध्ये अस्मत्पत्न्या (कन्यायाः) रजोत्पन्न सकल दोष निबर्हण सकलारिष्ठ शान्त्यर्थं श्री शान्ति करिष्ये ॥ १ ॥

तत्रादौ विघ्नविनाशार्थं गणपति पूजनं करिष्ये ॥ २ ॥

पश्चात् गणपति पूजन आदि क्रिया करने के उपरान्त चावल के स्थंडिल पर कलश स्थापना (पृष्ठ-९) से करें। पश्चात् 'श्री' की मूर्ति की प्रतिष्ठा कर उस पर विराजमान् करें। तदनन्तर "श्रीसूक्त" से "श्री" की मूर्ति का पूजन करें।

(१) आव्हानः— ॐ हिरण्य वर्णां हरिणीं सुवर्ण रजत स्रजां।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥

(२) आसनः— तांमआवहजातवेदोलक्ष्मीमपलगामिनी।
यस्यां हिरण्य विदेयं गामश्वं पुरुषानहं ॥

(३) पाद्यः— अश्वपूर्णां रथमध्यां हस्तिनाद प्रमोदिनी।
श्रियंदेवीमुपह्वये श्रीर्मादेवीर्जुषताम् ॥

(४) अर्घ्यः- कांसोस्मितां हिरण्यप्राकारामाद्रांज्वलंतीतृप्तां यंती । पद्मे स्थितां पद्मवर्णां तामिहो पह्वये श्रियं ॥

(५) आचमनः- चन्द्रांप्रभासांयशसाज्वलंतीं श्रियं लोकेदेव उ सुदारां तां पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीर्मेनश्यतां त्वां वृणोमि

पश्चात् पंचामृत स्नान करावें ।

(६) स्नानः- आदित्यवर्णे तपसोधि जातो वनस्पति स्तववृक्ष बिल्वः । तस्य फलानि तपसानुदंतु मायांतरायश्च बाह्या अलक्ष्मीः ॥

(७) वस्त्रः- उपैतु मां देव सखः कितिश्च मणिना सह ।
प्रादुर्भूतो सुराष्ट्रेस्मिन् कीर्तिं वृद्धिं ददातुमे ॥

(८) अलंकारः- क्षुत्पिपासामला ज्येष्ठा अलक्ष्मीर्नाशयाम्यहं ।
अभूति समृद्धिं च सर्वानिर्णुदमे गृहात् ॥

(९) गन्धः- गन्ध द्वारां दुराधर्षां नित्यपुष्टां करीषिणी ।
ईश्वरीं सर्व भूतानां तामिहोपह्वये श्रियं ॥

(१०) पुष्पः- मनसः काम आकूतिं वाचः सत्य मशीमहि ।
पशूनां रूपमन्यस्य मयि श्री श्रियतां यशः ॥

(११) धूपः- कर्दमेनप्रजाभूता मयिसंभ्रममर्दम ।
श्रियं वासयमे कुले मातरं पद्म मालिनीं ॥

(१२) दीपः- आपः सृजंतुस्निग्धा निचिक्लीतवसमेगृहे ।
निचदेवीं मातरं श्रियं वासयमे कुले ॥

(१३ नैवेद्यः- आर्द्रां पुष्करिणीं सुवर्णां हेममालिनी ।
सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो ममावह ॥

पश्चात् आचमन, फल और दक्षिणा प्रदान करें ।

(१४) नमस्कार:- आर्द्रां यः करिणीयष्टीं पिंगलां पद्ममालिनी ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥

(१५) प्रदक्षिणा:- तांमआवह जातवेदो लक्ष्मीमनपगामिनीं ।
यस्यां हिरण्य प्रभूति गावोदास्योश्वान्विदेय पुरुषानहं ॥

(१६) आरती:- श्रियेजातःश्रिय आनिरियायश्रियंवयोजरितृभ्यो दधाति । श्रियं वसाना अमृतत्व मायन्भवति सत्यारुमिधामितद्रौ ॥

पश्चात् श्रीश्चते० मंत्र से पुष्पांजलि देकर संकल्प करें ।

अनया पूजया भगवती श्री प्रियतां न मम ॥

पश्चात् अग्नि स्थापन व कुशकंडिका (पृष्ठ २५व३०) से र निम्न घृताहुति दें ।

ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ १ ॥ ॐ इन्द्राय० । २ ॥ ॐ अग्नये० ॥ ३ ॥ ॐ सोमाय० ॥ ४ ॥

पश्चात् पायस चरु से "श्री सुक्त" (ऊपर दिये गये षोड-षोपचार पूजन के मंत्र) से होम करें फिर घृताहुति से नवाहुति (पृष्ठ-८८) से होम करें । पश्चात् संश्रव प्राशन आदि कर होम समाप्ति की क्रिया करें ।

तदनन्तर आचार्य पूजित कलश से यजमान का अभिषेक करें फिर यजमान आचार्य का पूजन कर कलश सहित स्वर्णमयीं "श्री" प्रतिमा ब्राह्मण को दान दें एवम् ब्राह्मण भोजन करने का संकल्प करें ॥ इति ॥

४. वैधव्य हर विष्णु प्रतिमा दानः-

सर्व प्रथम कन्या आचमन व प्राणायाम कर संकल्प करे।

देशकालौ संकीर्त्य० वैधव्य हरं महाविष्णु प्रतिमादान करिष्ये ॥ १ ॥ तदंगत्वेन गणपति पूजनं च करिष्ये ॥ २ ॥

पश्चात् गणपति का पूजन (पृष्ठ-५) से करने के उपरान्त स्वर्णमयी विष्णु प्रतिमा का पुरुष सूक्त से षोडशोपचार पूजन करें। पश्चात् प्रतिमा हाथ में लेकर निम्न मंत्रों द्वारा प्रतिमा ब्राह्मण को दान करें

यन्मयाप्राचजनुषिघ्नंत्यापतिसमागतम्।
विषोपविष शस्त्राद्यैर्हतोवाति विरक्ताय ॥ १ ॥
प्राप्य मानं महा घोरं यशः सौख्य धनादहम्।
वैधव्याद्यति दुःखौ घनाशाय शुभ लब्धये ॥ २ ॥
बहु सौभाग्य लब्धयै च महाविष्णोरिमां तनुं।
सौवर्णी निर्मितां शक्त्या तुभ्यं सम्प्रददे द्विज ॥ ३ ॥

इमां सोपस्करां विष्णुप्रतिमां ममवैधव्य नाशार्थं तुभ्यमहं सम्प्रददे।

पश्चात् ब्राह्मण भोजन का संकल्प करें।

५. वैधव्य हर कुम्भविवाह

पश्चात् कन्या के माता पिता आचमन व प्राणायाम कर संकल्प करें।

देशकालौ संकीर्त्य० कन्या वैधव्य हरं कुम्भ विवाह करिष्ये ॥१॥ तत्रादौ विघ्नविनाशार्थं गणपति पूजन स्वति पुण्याह वाचन मातृ का पूजन अभ्युदय श्राद्ध च करिष्ये ॥ २ ॥

पश्चात् गणपति पूजन पृष्ट-५ से करने के उपरान्त कलश की स्थापना करें। कलश स्थापना के बाद विष्णु प्रतिमा का षोडषोपचार पूजन कर वह प्रतिमा कलश पर विराजमान् करें। अन्त में प्रार्थना करें।

वरुणांग स्वरूपाय, जीवनानां समाश्रय।
पतिं जीवय कन्यायाश्चिरं पुत्र सुखं कुरू ॥ १ ॥
देहि विष्णो वरं देव कन्यां पालय दुःखित।

पश्चात् संकल्प करें।

अद्येत्यादि० अहं विष्णुरूपिणे कुंभायेमां कन्यां श्री रूपिणीं समर्पयामि।

पश्चात् निम्न मंत्र से विष्णु प्रतिमा और कन्या के सूत्र से परिवेष्टन करें।

ॐ परित्वागिर्व्वणो गिर इमा भवन्तु विश्वतः। वृद्धायु मनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥

पश्चात् उस कुम्भ को किसी तालाब पर जाकर तोड़ दें। तदनन्तर आचार्य शुद्ध जल से कन्या का अभिषेक करें।

ॐ पञ्चनद्यः सरस्वती मपियन्ति सस्रोतसः। सरस्वती तु पञ्चदासौ देशे भवत्सरित् ॥

पश्चात् कन्या स्नानादि कर नवीन वस्त्र धारण करे व ब्राह्मण भोजन करावें।

६. गृहवास्तु पूजन (संक्षिप्त) :-

सर्व प्रथम आचमन व प्राणायाम कर संकल्प करें।

अद्येत्यादि० मम सर्वापच्छान्ति पूर्वकं दीर्घायुर्विपुलधनधान्य

पुत्रपौत्राद्यविच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभ शत्रुपराजयसदभी॰ सिद्धयर्थं सुवर्णरजतताम्रत्रपुसीसककांस्यलोहपाषाणाद्यष्टशल्यभेदिनीदो॰ यन्ययाद्यन्यथाभवनदोष परिहारार्थं नानाविधिजीवहिंसादि जन्यसक॰ दोषपरिहार पूर्वक सर्वारिष्टोपशान्त्यर्थं अस्मिन्गृहे चिरकाल निवासार्थं श्री परमेश्वर प्रीतये सग्रहमखां शालाकर्मपूर्तिकां वास्तुशान्ति करिष्ये॥१॥ तदङ्गतयादिग्रक्षणं कलश पूजनं कलशाराधनं गणपति पूजनं पुण्याह वाचनं मातृका पूजनं वसोर्द्धारायुष्य मन्त्र जपं नान्दीश्राद्धं ब्रह्माचार्य ऋत्विग्वरुणाम् च करिष्ये ॥ २ ॥

पश्चात् उक्त सम्पूर्ण क्रिया करने के उपरान्त शाला कर्म करें। शाला के मध्य हवन वेदी स्थापित कर शतमंगल नाम्नि अग्नि स्थापित करें। तदनन्तर श्वेतवस्त्र पर चावल से ८१ स्थंडिल बनाकर अग्नेय आदि चारों कोण पर ४ कीलें गाढ़ दें।

विशान्तु भूतले नागा लोकपालश्च सर्वतः।
अस्मिन् गृहे ऽवतिष्ठन्तामायुर्बलकराःसदा॥

फिर उक्त मंत्र से ही चारों कीलों को दुगने सूत्र से वेष्टन करें। पश्चात् आग्नेय आदि कोण पर बलिदान करें।

अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान् समाश्रिताः। वर्जितेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमं॥ अग्नये इमं बलिं समर्पयामि ॥ १ ॥ नैऋत्याधिपतिश्चैव नैऋत्यां ये च राक्षसाः। बलि॰॥ २ ॥ नमो वै वायु रक्षोभ्यो ये चान्ये तान् समाश्रिताः। बलि॰ ॥ ३ ॥ रुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये तान् समाश्रितः। बलि॰। ईशानाय बलिं समर्पयामि ॥ ४ ॥

पश्चात् पूर्व-पश्चिम की १० रेखाओं का पूजन करें।

शान्तायै नमः। यशोवत्यै। कान्त्यै। विशालायै। प्राणवाहिन्यै सत्यै। सुमत्यै। नन्दायै। सुभद्रायै। सुरथायै।

पश्चात् दक्षिण-उत्तर की १० रेखाओं का पूजन करें।

हिरण्यायै । सुव्रतायै । लक्ष्म्यै । विभूत्यै । विमलायै । प्रियायै । जयायै । ज्वालायै । विशोकायै । इंडायै ।

पश्चात् "मनोजूति०" मंत्र से प्रतिष्ठा पूर्वक पूजन कर नमस्कार करें । "रेखा देवताभ्यो नमः ॥"

पश्चात् ८१ वास्तु मंडल देवों का आव्हान व पूजन करें ।

ॐ शिखिने नमः । शिखिनं आवाहयामि स्थापयामि पर्जन्याय, जयन्ताय, कुलिशायुधाय, सूर्याय, सत्याय, भृशाय, आकाशाय, वायवे, पूष्णे, विपथाय, गृहक्षताय, यमाय, गन्धर्वाय, भृङ्गराजाय, मृगाय, पितृभ्यो, दौवारिकाय, सुग्रीवाय, पुष्पदन्ताय, वरुणाय, असुराय, शोषाय, पापाय, रोगाय, अहये, मुख्याय, भल्लाटाय, सोमाय, सर्पाय, अदित्यै, दित्यै, आपाय, सवित्राय, जयाय, रुद्राय, अर्यम्णे, सवित्रे, विवस्वते, विबुधाय, मित्राय, राजयक्ष्मणे, पृथ्वीधराय, आपवत्साय, ब्रह्मण्ये, चरक्यै, विदार्यै, पूतनायै, पापरक्षायै, स्कन्दाय, अर्यम्णे, जृम्भकाय, पिलिपिच्छाय, इन्द्राय, अग्नये, यमाय, निर्ऋतये, वरुणाय, वायवे, कुबेराय, ईश्वराय, ब्रह्मणे, अनन्ताय, उग्रसेनाय, डामराय, महाकालाय, पिलिपिच्छाय, हेतुकाय, त्रिपुरान्तकाय, अग्निवैतालाय, असिवैतालाय, कालाय, करालाय, एकपादाय, भीमरूद्राय खेचराय, तलवासिने ॥

पश्चात् "मनोजूति०" मन्त्र से प्रतिष्ठा पूर्वक पूजन कर नमस्कार करें । "वास्तु मंडल देवताभ्यो नमः ॥"

पश्चात् ८१ स्थंडिल के मध्य वास्तु कलश की स्थापना करें । फिर वास्तु ध्रुव मूर्ति की प्राण प्रतिष्ठा कर निम्न मंत्र से वास्तुदेव का पूजन करें ।

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो ऽअनमीवोभवानः । यत्वे महे प्रतिपन्नो जुषस्व शन्नोभवद्विपदेशं चतुष्पदे ॥ ॐ वास्तुपुरुषाय नमः ।

पश्चात् षोडषोपचार पूजन कर नमस्कार करें।

वास्तुदेव नमस्ते ऽस्तु भूशय्याभिरत प्रभो।
मद्गृहे धनधान्यादि समृद्धिं कुरु सर्वदा॥

पश्चात् "वास्तु पुरुषाय नमः" कहकर पायस बलि दें।

पश्चात् यजमान पूजित कलश लेकर बाहर आकर द्वार पूजन करें।

(१) पूर्व द्वार-ग्रामणीपीठे पक्षीन्द्राय नमः। (२) दक्षिणे-चण्डाय नमः। (३) वामे-प्रचन्डाय नमः। (४) उर्ध्वं-द्वारश्रियै नमः। (५) देहल्यां द्वारपीठ मध्ये-वास्तु पुरुषाय नमः। (६) दक्षिणशाखायां-गंगायै०। (७) वामशाखायां-यमुनायै०। (८) दक्षिणे-शङ्खनिधये०। (९) वामे-पद्मनिधये०। (१०) द्वारस्य ऊर्ध्वं आग्नेयां-गणपतये०। (११) अधः नैऋत्यां-दुर्गायै०। (१२) अधः वायव्यां-सरस्वत्यै०। (१३) ऊर्ध्वं ईशान्यां-क्षेत्रपालय०।

पश्चात् गन्धादि पूजन कर, यजमान आचार्य से पूछे: "ब्रह्मन प्रविशामि" तब आचार्य कहे "प्रविशस्व" पश्चात् "ऋचं वाच" शान्ति सूक्त का पाठ करें। पश्चात् वर्द्धिनी कलश दक्षिण स्कन्ध पर रखकर द्वार से स्पर्श करते हुए गृह प्रवेश करें और वह कलश ईशान कोण में स्थापित करें। पश्चात् होम करें।

ॐ इहरतिरिहरमध्वमिहधृतिरिहस्वधृतिः स्वाहा, इदमग्नये न मम ॥ १ ॥ ॐ उपसृजं धरुणं मात्रे धरुणो मातरन्धयन्। रायस्पोषमस्मासुदीधरत्स्वाहा, इदं अग्नये न मम ॥ २ ॥ ॐ वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो ऽअनमीवोभवानः। यत्वेमहे प्रतिपन्नो जुषस्व शन्नो भवद्विपदे शं चतुष्पदे। इदं वास्तोष्पतये न मम ॥ ३ ॥ वास्तोष्पतेप्रतरणोन ऽएधिगय स्फानोगोभिरश्वेभिरिन्दो। अजरासस्ते सख्येस्यामपितेवपुत्रान्प्रतिनो जुषस्व शन्नो भवद्विपदेशं चतुष्पदे स्वाहा, इदं वास्तोष्पतये न मम ॥ ४ ॥ ॐ वास्तोष्पते शग्मयास॰ सदाते सक्षीमहि रण्वया गातुमत्या। पाहिक्षेमऽ

योगेवरन्नोयूयपातस्व स्तिभिः सदानः स्वाहा । इदं वास्तोष्पतये न मम ५ ॥ ॐ अमिहा वास्तोष्पते विश्वारूपाण्याविशम् ॥ सखा सुशेव धेनः स्वाहा इद वास्तोष्पतये न मम ॥ ६ ॥ ॐ प्रजापतये स्वाहा इदं जापतये न मम ॥ ७ ॥

पश्चात् चरु से होम करें।

ॐ अग्निमिन्द्रं बृहस्पतिं विश्वांश्चदेवानुह्वये । सरस्वतीं च जीं च वास्तु मे दत्त वाजिनः स्वाहा ॥ १ ॥ ॐ सर्वदेवजनान्सर्वान्हिम न्तँ सुदर्शनम् । वसुंश्च रुद्रानादित्यानीशानं जगदैः सह । एतान्सर्वान्प्र द्ये ऽहंवास्तुमेदत्तवाजिनः स्वाहा ।२॥ ॐ पूर्वाह्णमपराह्णं चोभौमध्यंदि ासह । प्रदोषमर्धरात्रं चव्युष्टां देवीं महापथां । एता०……स्वाहा ॥३॥ ॐ कर्तारं च विकर्तारं विश्वकर्माणमोषधींश्चवनस्पतीन् । एता०…… ाहा ॥ ४ ॥ ॐ धातारं च विधातारं निधीनांचपतिँ सह एता०…… ्वाहा ॥ ५ ॥ ॐ स्योनँ शिवमिदंवास्तुदत्तं ब्रह्मप्रजापतिसर्वाश्च देवताः स्वाहा ॥ ६ ॥

पश्चात् ग्रह होम ८१ वास्तु पीठ देवताओं का होम करें। एवम् १०-१० रेखाओं के नाम मन्त्र का होम करें। फिर निम्न मंत्र का १०८ वार होम करें।

वास्तोष्पतते प्रतिजानीह्यस्मान्स्वावेशोऽअनमीवोभवानः । यत्वे महे प्रतिपन्नो जुषस्व शन्नोभवद्विपदे चतुष्पदे स्वाहा इदं वास्तोष्पतये न मम ॥

पश्चात् घृताहुति दें।

ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥

पश्चात् संश्रव प्राशन आदि कर होम समाप्ति कर्म करें।

तदनन्तर पूर्वादिक्रम से चारों दिशाओं पर ध्वज लगावें और उन पर सूत्र वेष्टन करें और उन पर दूध और जल से छींटे लगावें। पश्चात् गृह प्रवेश करें। फिर आग्नेय कोण में खड्डा खोदकर उसमें किसी पेटी में वास्तु मूर्ति रखें फिर उनका

गन्धादि पूजन करें। फिर उस खड्डे को बन्द कर जल सिंचन करें। पश्चात् पंचगव्य घर में छिड़कावें। फिर ब्रा यजमान का अभिषेक करें। पश्चात् देवताओं का विसर्जन ब्राह्मण भोजन का संकल्प करें ॥इति॥

७. गृह शान्ति सामग्री:-

सफेद वस्त्र, लाल वस्त्र, ब्राह्मण वरुणी के वस्त्र, तांबे का लो पीतल की बाटकी, ढक्कन सहित मृतिका पात्र, रामकटोरे, पान के पर सुगन्धित तेल, दूध, दही, गोबर, छाणे, छोडे, मिश्री-पतासा, सुपा बादाम, अगरबत्ती, रुई, गुलाल, कुकुम, हल्दी, नारियल, मोली, कपासि सप्त अन्न, चावल, गेहूँ केसर, काली दाख, अद्रक, आँवला, सूतली, घृ माचीस, जव, तिल, शहद, शक्कर, गुड़, पुष्प, ऋतुफल, लौंग, इलायची हवन सामग्री, दर्भ, दुर्वा, आम या पीपल के पत्ते, आदि।

८. संस्कार सामग्री:-

१ सीमान्त संस्कार:-त्रीणी शैली, उदंबर की लकड़ी, उदंबर के पुष्प, वेणी, गूलर या जौ की माला।

२. नामकरण:-कांस्य पात्र, स्वर्ण ततु दधि, घृत, मधु.

३. चौल:-गर्म व ठंडा जल, घृत, दधि, मक्खन, त्रीणी शैली गोबर, लाल वस्त्र।

४. उपनयनः-छाणे छोडे, समिधा, घृत, कीटी, चावल, वस्त्र, पलास का दंड, मूँज, यज्ञोपवीत, मृगछाला, मक्खन दधि, आठकुम्भ, तिल, पुष्पमाला, अंजन या काजल, काच, बाँस का दंड, बालक के वस्त्र व कुंडल, ब्राह्मण वरुणी के वस्त्र, आदि।

५. सामान्त पूजनः-पुष्पमाला, नारियल, फल, गन्ध, पुष्प, दूध,

६. विवाह:-पुष्पमाला पुष्प, यज्ञोपवीत कुंकुम, सिन्दुर, मृतिका पात्र ढक्कन सहित, रामकटोरे, सुपारी, मिश्री, केसर, पान के पत्ते,

...नफल, मौली, नारियल, मुकुट, वर के वस्त्र, चावल की खीलें, घृत, ...हद, दूध, दही, शक्कर, दर्भ, चावल, मंडप सामग्री आदि।

बटुकाष्टक लेखक श्री फतहचन्द वासु

सत्यानन्दमयः सुरेश्वरवरो, गोपीपतिः मापतिः
भक्तानां हितकारिकार्यकरणे, दक्षो दयालुः सदा।
त्यक्त्वा सर्वं सुखानि ये स्वशरणं, याता हितत्पालकः
सः श्रीमान् सततं च सुज्ञसुभटोः, कुर्याच्छुभं मङ्गलम्॥ १॥
यो गोवर्द्धन धारण हि कृतवान्, हर्तुं सुरेन्द्रं मदम्
स्वीयं वै पितर तु यज्ञ करणात्, रुद्ध्वा गिरेरर्चनम्।
गोपेभ्यः किल कारित सुरपते, र्मान स्तु नष्टस्तदाः
सः श्रीमान् सतत च सुज्ञ सुभटोः, कुर्याच्छुभं मङ्गलम्॥ २॥
गोपीनं हृदये सदा विहरण, प्रेम्णा तु कृत्वा हि यः
तच्चित्त हृतवान् सव विषयतः, स्वीये स्वरुपे धृतम्।
दत्त्वा वै परमं फल त्वभयदं, रासोत्सवे हर्षदम
सः श्रीमान् सतत च सुज्ञ सुभटोः, कुर्याच्छुभं मङ्गलम्॥ ३॥
यस्याज्ञां सकलाः सुराः किल मुदा, धृत्वा नियोगे रताः
प्रत्येकस्तु करोति वै नियमतः, स्वीय च कार्यं सदा।
भूमौ स्यात्तु यदा हि धर्मगलनं, नानाविधो जायतेः
सः श्रीमान् सततं च सुज्ञ सुभटोः कुर्याच्छुभ मङ्गलम्॥ ४॥
श्री कृष्णः खलनाशको यदुपतिः, राधापतिर्गोरतिः
ब्रह्मण्यः किल तत्समः शरणदः, कुत्रापिनो दृश्यते।
यैर्दीनै र्मनसा धृतं तदरणम् संसार पारंगताः
सः श्रीमान् सतत च सुज्ञ सुभटोः, कुर्याच्छुभं मङ्गलम्॥ ५॥
व्राजानां सकल तु दुःखनिचयं, नष्टीकृतं वै स्वतः
कंसप्रेषित पूतनाद्यसुरजान्, हत्वा कृत निर्भयाः॥
मल्लानां च मदं मुदा झटिति वै चूर्णीकृत लीलयाः
सः श्रीमान् सतत च सुज्ञ सुभटोः, कुर्याच्छुभं मङ्गलम्॥ ६॥

बाल्येयो नवनीत चौर्य कुशलो, गोपैः सह क्रीड़ते।
वैविध्यं किल चास्तियस्यचरिते, सर्वं मुखे दर्शित॥
पार्थाग्रे द्विभुजो चतुर्भुजधरो, भूतो विराड् रूपवान्।
सः श्रीमान् सततं च सुज्ञ सुभटोः, कुर्याच्छुभ मङ्गलम्॥ ७॥
कालीयस्य विषेण दुःखान्वि हं, प्राप्ताः खगा मानवः
सम्पातो यमुनाजले हि कृतवान्, नाग स्तुति सारितः॥
गोपा वै पशवः खगाः प्रियजना, स्त्तेषां कृतं मङ्गलम्
सः श्रीमान् सतत च सुज्ञ सुभटोः, कुर्याच्छुभं मङ्गलम्॥ ८॥

१०. ग्रहशान्ति देवस्थापन-चित्रः-

ईशान — पूर्व — अग्नि

दीपक — दीवार पर सप्त घृत मातृका — षो० मा०

बु	शु	चं
गु	सू	म
के	श	रा

प० वि०

० ० ०

० ० ●

म० मा

| | | | |

१०	१३	१२	११
९	१७	३	७
८	१।१४	२	६
१६	५	४	१५

उत्तर

स्व. पु. — स्व. पु.

प्र. प्रो — हवन वेदी — ब्रह्मा

यजमान

नैऋत्य

वायव्य — पश्चिम

पुस्तक के सम्बन्ध में सम्मतियाँ

(१)

श्री पं० ईश्वरलाल जोशी और श्री पं० परमानन्द शास्त्री द्वारा लिखित "संस्कार प्रदीप" ग्रन्थ देखा। यह पुस्तक शास्त्रीय पद्धति के अनुसार सुन्दर लिखी गई है। इनका यह प्रयास प्रशंसनीय है।

विष्णुदत्त शर्मा अग्निहोत्री
अग्निहोत्रालय आश्रम, जोधपुर

(२)

श्री ईश्वलाल जोशी एवम् श्री परमानन्द शर्मा द्वारा सम्पादित "संस्कार प्रदीप" का अवलोकन किया। लेखक महोदय ने संस्कारों के सुन्दर विवेचन के साथ २ आवश्यक आधुनिक स्वनिर्मित पद्यों का समावेश कर सम्पादित ग्रन्थ को मौलिक रूप दिया है। आवश्यक हिन्दी भाषा में टिप्पणियां लिखने से पुस्तक की उपादेयता जनसाधारण के लिए अत्यधिक बढ़ गई है। ग्रन्थारम्भ में संस्कार रक्षा का जो अपना उद्देश्य बताया गया है। उसमें इस ग्रन्थ की रचना सफल सिद्ध होगी, ऐसा मेरा विश्वास है!

रामनारायण चतुर्वेदी प्राचार्य श्री दरबार संस्कृत कालेज, जोधपुर

(३)

श्री ईश्वरलाल जोशी एवम् श्री परमानन्द शास्त्री द्वारा रचित "संस्कार प्रदीप" का यह संस्करण कर्मकांड प्रेमियों के लिये सुन्दर मार्ग प्रशस्त करता है। इसमें कुछ नवीन प्रकरणों व स्वनिर्मित पद्यों का समावेश कर पुस्तक की महत्ता को बढ़ा दिया है। इस पुस्तक के साथ रहने से ब्राह्मणों को निजी संस्कृति व संस्कार के संरक्षण में बल मिलेगा।

लेखराज द्विवेदी
ज्योतिर्विद कर्मकाण्डी धर्म विशारद
बी०ए०,बीए०ड० साहित्य रत्न, भीनमाल (राज०)